Subject- **Sanskrit**  Course Code-APSNS 601DEE-1B

Coures Title- Kaavya & Philosophy  Course Topic- **Gita (2nd chapter)**

**न जायते म्रियते वा कदाचिन्नायं भूत्वाऽभविता वा न भूयः।**

**अजो नित्यः शाश्वतोऽयं पूराणो, न हन्यते हन्यमाने शरीरे।। 2/20।।**

**शाङ्करभष्यम्** – ' न जायते' न उत्पद्यते जनिलक्षणा वस्तुविक्रिया न आत्मनो विद्यते इत्यर्थः। न ' म्रियते वा'। वाशव्द् चार्थे। न म्रियते च इति अन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते। 'कदाचित्' शव्दः सर्वविक्रियाप्रतिषेधैः सम्वध्यते 'न' कदाचित् जायते, न कदाचित् म्रियते, इति एवम्। यस्मात् 'अयम्' आत्मा 'भूत्वा' भवनक्रियाम् अनुभूय पश्चात् 'अभाविता' अभावं गन्ता 'न भूयः' पुनः (भविष्यति) तस्मात् न म्रियते। सो हि भूत्वा न भविता स म्रियते इति उच्यते लोके।' वा' शव्दात् च अयम् आत्मा अभूता भविता वा देहवत् न भूयः पुनः तस्मात् न जायते । यो हि अभूत्वा ऊविता स जायते इति उच्यते, न एवम् आत्मा अतो न जायते। यस्मात् एवं तस्मात् 'अज' यस्मात् न म्रियते तस्मात् 'नित्यः' च। यद्यपि आद्यन्तयोः विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति, तथापि मध्यभविनीनां विक्रियाणां स्वशव्दैः एव तदर्थैः प्रतिषेधः कर्तव्य इति अनूक्तानाम् अपि यौवनादिसमन्तविक्रियाणां प्रतिषेधो यथा स्यात् इति आह 'शाश्वत' इत्यादिना। 'शाश्वत' इति अपक्षयलक्षणा विक्रिया प्रतिषिध्यते शश्वद्भवः शाश्वतः। न अपक्षीयते स्वरूपेण, निरवयवत्वात्, निर्गुणत्वात् च न अपि गुणक्षयेण अपक्षयः। अपक्षयविपरीता अपि बृद्धिलक्षणा विक्रिया प्रतिषिध्यते 'पुराण' इति। यो हि अवयवागमेन उपचीयते स वर्धते अभिनव इति च उच्यते। 'अयं' तु आत्मा निरवयवत्वात् पुरा अपि नव एव इति 'पुराणो' न वर्धते इत्यर्थः। तथा ' न हन्यते' न विपरिणम्यते 'हन्यमाने' विपरिणम्यमाने अपि 'शरीरे'।हन्तिः(हन्यते) अत्र विपरिणामार्थो द्रष्टव्यः अपुनरुक्ततायै न विपरिणम्यते इत्यर्थः।